# सदाशिव महेन्द्र स्तुतिः

## Sadashiva Mahendra Stutih

---

सदाशिवमहेन्द्रस्तुतिः ।

परतत्त्वलीनमनसे प्रणमद्भवबन्धमोचनायाशु ।
प्रकटितपरतत्त्वाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१॥

परमशिवेन्द्रकराम्बुजसंभूताय प्रणम्रवरदाय ।
पदधूतपङ्कजाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२॥

विजननदीकुञ्जगृहे मञ्जुळपुलिनैकमञ्जुतरतल्पे ।
शयनं कुर्वाणाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३॥

कामाहिद्विजपतये शमदममुखदिव्यरत्नवारिधये ।
शमनाय मोहविततेः प्रणतिं कुर्मः सदाशिवेन्द्राय ॥४॥

नमदात्मबोधदात्रे रमते परमात्मतत्त्वसौधाग्रे ।
समबुद्धयेऽश्महेम्नोः प्रणतिं कुर्मः सदाशिवेन्द्राय ॥५॥

गिलिताविद्याहालाहलहतपुर्यष्टकाय बोधेन ।
मोहान्धकाररवये प्रणतिं कुर्मः सदाशिवेन्द्राय ॥६॥

शममुखषट्कमुमुक्षाविवेकवैराग्यदाननिरताय ।
तरसा नतजनततये प्रणतिं कुर्मः सदाशिवेन्द्राय ॥७॥

सिद्धान्तकल्पवल्लीमुखकृतिकर्त्रे कपालिभक्तिकृते ।
करतलमुक्तिफलाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥८॥

तृणपङ्कलिप्तवपुषे तृणतोऽप्यधरं जगद्विलोकयते ।
वनमध्यविहरणाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥९॥

निगृहीतहृदयहरये प्रगृहीतात्मस्वरूपरत्नाय ।
प्रणताब्धिपूर्णशशिने प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१०॥

अज्ञानतिमिररवये प्रज्ञानांभोधिपूर्णचन्द्राय ।
प्रणताघविपिनशुचये प्रणतिं कुर्मः सदाशिवेन्द्राय ॥११॥

मतिमलमोचनदक्षप्रत्यग्ब्रह्मैक्यदाननिरताय ।
स्मृतिमात्रतुष्टमनसे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१२॥

निजगुरुपरमशिवेन्द्रश्लाघितविज्ञान काष्ठाय ।

निजतत्त्वनिश्चलहृदे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१३॥

प्रविलाप्य जगदशेषं परिशिष्टखण्डवस्तुनिरताय ।
आस्यप्राप्तान्नभुजे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१४॥

उपधानीकृतबाहुः परिरब्धविरक्तिरामो यः ।
वसनीकृतखायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१५॥

सकलागमान्तसारप्रकटनदक्षाय नम्रपक्षाय ।
सच्चित्सुखरूपाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१६॥

द्राक्षाशिक्षणचतुरव्याहाराय प्रभूतकरुणाय ।
वीक्षापावितजगते प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१७॥

योऽनुत्पन्नविकारो बाहौ म्लेच्छेन छिन्नपतितेऽपि ।
अविदितममतायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१८॥

न्यपतन्सुमानि मूर्धनि येनोच्चरितेषु नामसूग्रस्य ।
तस्मै सिद्धवराय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥१९॥

यः पापोनोऽपि लोकान तरसा प्रकरोति पुण्यः निष्ठाग्र्यान ।
करुणाम्बुराशयेऽस्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२०॥

सिद्धेश्वराय बुद्धेः शुद्धिप्रदपादपद्मनमनाय ।
बद्धे प्रमोचकाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२१॥

हृद्याय लोकविततेः पद्यावलिदाय जन्ममूकेभ्यः ।
प्रणतेभ्यः पदयुगळे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २२॥

जिह्वोपस्थरतानप्याह्वोच्चारेण जातु नैजस्य ।
कुर्वाणाय विरक्तान्प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२३॥

कमनीयकवनकर्त्रे शमनीयभयापहारचतुराय ।
तपनीयसदृशवपुषे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२४॥

तारकविद्यादात्रे तारकपतिगर्ववारकास्याय ।
तारजपप्रवणाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२५॥

मूकोऽपि यत्कृपा चेल्लोकोत्तरकीर्तिराशु जायेत ।
अद्भुतचरितायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२६॥

दुर्जनदूराय तरां सज्जनसुलभाय हस्तपात्राय ।
तरुतलनिकेतनाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२७॥

भवसिन्धुधारयित्रे भवभक्ताय प्रणम्रवश्याय ।
भवबन्धविरहिताय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२८॥

त्रिविधस्यापि त्यागं वपुषः कर्तुं स्थलत्रये य इव ।
अकरोत्समाधिमस्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥२९॥

कामिनमपि जितहृदयं क्रूरं शान्तं जडं सुधियम ।
कुरुते यत्करुणाऽस्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३०॥

वेदस्मृतिस्थविद्वल्लक्षणलक्ष्येषु सन्दिहानानाम ।
निश्चयकृते विहर्त्रे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३१॥

बालारुणनिभवपुषे लीलानिर्धूतकामगर्वाय ।
लोलाय चितिपरस्यां प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३२॥

शरणीकृताय सुगुणैणीकृतरक्तपङ्कजाताय ।
धरणीसद्रुक्क्षमाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३३॥

प्रणताय यतिवरेण्यैर्गणनाथेनाप्यसाध्यविघ्नहृते ।
गुणदासीकृतजगते प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३४॥

सहमानाय सहस्राण्यप्यपराधान्प्रणम्रजनरचितान ।
सहसैव मोक्षदात्रे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३५॥

धृतदेहाय नतावलितूणप्रज्ञाप्रदानवाञ्छातः ।
श्रीदक्षिणवक्त्राय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥३६॥

तापत्रयार्तहृदयस्तापत्रयहारदक्षनमनमहम ।
गुरुवरबोधितमहिमन शरणं यास्ये तवाङ्घ्रिकमलयुगम ॥ ३७॥

सदात्मनि विलीनहृत्सकलवेदशास्त्रार्थवित सरित्तटविहारकृत सकललोकहृत्तापहृत ।
सदाशिवपदाम्बुजप्रणतलोकलभ्य प्रभो सदाशिवयतीट सदा मयि कृपामपारां कुरु ॥३८॥

पुरा यवनकर्तनस्रवदमन्दरक्तोऽपि यः पुनः पदसरोरुहप्रणतमेनमेनोविधिम ।
कृपापरवशः पदं पतनवर्जितं प्राप यत्सदाशिवयतीट स मय्यनवधिं कृपां सिञ्चतु ॥३९॥

हृषीकहृतचेतसि प्रहृतदेहके रोगकैरनेकवृजिनालये शमदमादिगन्धोज्झिते ।
तवाङ्घ्रिपतिते यतौ यतिपते महायोगिराट सदाशिव कृपां मयि प्रकुरु हेतुशून्यां द्रुतम ॥४०॥

न चाहमतिचातुरीरचितशब्दसङ्घैः स्तुतिं विधातुमपि च क्षमो न च जपादिकेऽप्यस्ति मे ।
बलं बलवतां वर प्रकुरु हेतुशून्यां विभो सदाशिव कृपां मयि प्रवर योगिनां सत्वरम ॥४१॥

शब्दार्थविज्ञानयुता हि लोके वसन्ति लोका बहवः प्रकामम ।
निष्ठायुता न श्रुतदृष्टपूर्वा बिना भवन्तं यतिराज नूनम ॥४२॥

स्तोकार्चनप्रीतहृदम्बुजाय पादाब्जचूडापररूपधर्त्रे ।
शोकापहर्त्रे तरसा नतानां पाकाय पुण्यस्य नमो वतीश ॥४३॥

नाहं हृषीकाणि विजेतुमीशो नाहं सपर्बाभजनादि कर्तुम ।
निसर्गया त्वं दययैव पाहि सदाशिवेमं करुणापयोधे ॥४४॥

कृतयाऽनयानतावलिकोटिगतेनातिमन्दबोधेन ।
मुदमेहि नित्यतृप्तप्रवर स्तुत्या सदाशिवायाशु ॥४५॥

इति श्रीमज्जगद्गुरुशृङ्गगिरि श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिर्विरचिता सदाशिवमहेन्द्रस्तुतिः समाप्ता ॥

**www.shaivam.org**